# Siruvachchur Madhurambika Suprabhatam

# સિરુવાચ્ચૂર્ શ્રીમધુરકાલિકામ્બાસુપ્રભાતમ્

## Document Information

Text title : MadhurakalikAmba Suprabhatam

File name : madhurakAlikAmbAsuprabhAtam.itx

Category : devii, suprabhAta, dashamahAvidyA

Location : doc_devii

Transliterated by : PSA Easwaran

Proofread by : PSA Easwaran

Latest update : January 15, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 15, 2022

*sanskritdocuments.org*

# સિરુવાચ્ચૂર્ શ્રીમધુરકાલિકામ્બાસુપ્રભાતમ્

॥ શ્રીઃ ॥

ૐ નમઃ શ્રી દક્ષિણકાલિકાયૈ ॥

માતઃ શ્રીમધુરામ્બિકામ્બ સિરુવાચ્ચૂર્ રમ્યદેવાલાયે
ભક્તાનુગ્રહકારણાય સતતં સિંહાધિરૂઢે પરે ।
ભક્તાનાં સ્મરણેન તુષ્ટહૃદયે સર્વાપદાં નાશિનિ
માતઃ શ્રીમધુરામ્બિકે સુવિદિતે તે સુપ્રભાતં શિવમ્ ॥ ૧॥

શ્રીમચ્છઙ્કરશઙ્કરાર્યભગવત્પાદૈઃ સુસમ્પૂજિતે
તન્મન્ત્રૈશ્ચ સુમન્ત્રિતાખિલજનક્ષેમપ્રદે યન્ત્રકે ।
રાજન્તી સકલેષ્ટમાશુ તનુષે માતેવ વાત્સલ્યતઃ
માતઃ શ્રીમધુરામ્બિકે સુલલિતે તે સુપ્રભાતં શિવમ્ ॥ ૨॥

ત્વં હૈમાદ્રિસમુદ્ભવાપિ ચ પુનઃ વિન્ધ્યાદ્રિવાસા મુદા
શ્રીમદ્દક્ષિણકાલિકેતિ સિરુવાચ્ચૂર્ નૈજરમ્યાલયે ।
ભક્તાભીષ્ટફલપ્રદે ચ નમતાં સર્વાર્તિસંહારિણિ
માતઃ શ્રીમધુરામ્બિકે ભયહરે તે સુપ્રભાતં શિવમ્ ॥ ૩॥

અષ્ટાભિશ્ચ કરૈઃ સહેતિસુભગૈઃ શત્રુક્ષયે દીક્ષિતે
ભક્તાનુગ્રહણે વરાભયકરૌ વીરાસનં ચાશ્રિતે ।
જ્વાલામાલિકયા પ્રદીપ્તમતુલં શૂલં કરે બિભ્રતી
માતઃ શ્રીમધુરામ્બિકે સુમહિતે તે સુપ્રભાતં શિવમ્ ॥ ૪॥

કોણાનાં ત્રિતયેન રમ્યસુમહાયન્ત્રાલયે દીવ્યસે
શક્તીનાં નવભિઃ સુકોણસુગતૈર્દિક્પાલકૈઃ સંવૃતે ।
સ્વીયૈર્મન્ત્રવરૈઃ સુમન્ત્રિતમહાયન્ત્રાલયે દીપ્યસે
માતઃ શ્રીમધુરામ્બિકેઽતિમધુરે તે સુપ્રભાતં શિવમ્ ॥ ૫॥

લોકાનાં હિતકામ્યયા કરુણયા શ્રીકાલિ હત્વા રિપૂન્

નાનારૂપધરં મહોગ્રમહિષં શુમ્ભં નિશુમ્ભં તથા ।
રક્તાક્ષં શઠરક્તજિહ્મપરં ચણ્ડં ચ મુણ્ડં ક્ષણાત્
ચામુણ્ડે શ્રીમધુરામ્બિકે વિજયસે તે સુપ્રભાતં શિવમ્ ॥ ૬॥

ત્વં ભીતાનદિતિજાન્ સવાસવમુખાન્ દેવાન્ હિ સંરક્ષિતું
શક્તીનાં ચ ગણૈઃ સહૈવ સમરે તાન્ ચાવધીર્દૈત્યકાન્ ।
ભૂયશ્ચાપિ ભયે સદૈવ મનુજાન્ રક્ષામિ રક્ષામિ ચેતિ
આનન્દાત્ ત્વમસાન્ત્વયઃ કિલ શિવે તે સુપ્રભાતં શિવમ્ ॥ ૭॥

વાયુર્વાતિ સુશીતલઃ સુખકરઃ શાન્તં નભો વર્તતે
પૂષોદેતિ ફલન્તિ ચૈવ તરવઃ પુષ્પન્તિ મલ્લ્યાદયઃ ।
ઉદ્બુધ્યસ્વ શિવે કટાક્ષય જનાન્ ભક્તાન્ હિ રક્ષેક્ષણે
માતઃ શ્રીમધુરામ્બિકે સહૃદયે તે સુપ્રભાતં શિવમ્ ॥ ૮॥

સર્વે ભક્તજનાઃ સદારશિશુકાઃ સન્નારિકેલં ફલં
તામ્બૂલં કમલં સુગન્ધિ ચ નવં ગવ્યં ચ ગન્ધં કરે ।
ધૃત્વા ત્વાં પ્રતિપાલયન્તિ જગતાં શ્રીમાતરં કાલિકાં
માતઃ શ્રીમધુરામ્બિકે સુલલિતે તે સુપ્રભાતં શિવમ્ ॥ ૯॥

તારાનાયકશોભિરત્નમકુટે તાપિઞ્છવર્ણોજ્જ્વલે
તાર્તીયીકવિલોચનાગ્નિમહિતે તામ્બૂલપૂર્ણાનને ।
માધ્વીકાદિમહાભિષેકમુદિતે માલાવિભૂષોજ્જ્વલે
માતઃ શ્રીમધુરામ્બિકે શુભકરે તે સુપ્રભાતં શિવમ્ ॥ ૧૦॥

વ્યાદાયૈવ વિશાલમાસ્યમચિરાદ્ભિત્વા રિપોઃ ચાપ્યુરઃ
પીત્વા શોણિતમાશુ રક્તવદને રક્તેક્ષણે જિહ્વિકે ।
તાર્તીયીકવિલોચનેન દિતિજાન્ યા ભસ્મસાચ્ચાકરોઃ
માતઃ શ્રીમધુરામ્બિકે વિધિનુતે તે સુપ્રભાતં શિવમ્ ॥ ૧૧॥

દૃષ્ટ્વા વીર્યમચિન્ત્યમદ્ભુતતમં વિસ્માપનીયં સદા
બ્રહ્મા-વિષ્ણુ-મહેશ્વરાદિમસુરા યાં તુષ્ટુવુઃ શ્રીસુમૈઃ ।
સા ત્વં વિશ્વજનીનવન્દ્યવિભવે હૈયઙ્ગવીનાશયે
માતઃ શ્રીમધુરામ્બિકેઽતિસુલભે તે સુપ્રભાતં શિવમ્ ॥ ૧૨॥

દ્વાવિંશન્મનુભિઃ સદા સુમહિતે શ્રીભદ્રકાલીશ્વરી-
દુર્ગા-લક્ષ્મિ-સરસ્વતીત્યભિધયા વિખ્યાતચણ્ડીશ્વરિ ।
શૂલોદ્ભાસિકરામ્બુજે નતજને સર્વસ્વદાનોદ્યતે

માતઃ શ્રીમધુરામ્બિકે સુસુભગે તે સુપ્રભાતં શિવમ્ ॥ ૧૩॥

સોમે ભાર્ગવવાસરેઽપિ સુજનૈઃ નાનાદિગન્તાગતૈઃ
તૈલાભ્યક્તશિરોભિરેવ સતતં સંસેવિતાઙ્ઘ્રિદ્વયે ।
માતૃણાં ચ સુસપ્તભિશ્ચ નવભિર્દુર્ગાદિભિઃ સંવૃતે
માતર્મઙ્ગલકારિણીષ્ટવરદે તે સુપ્રભાતં શિવમ્ ॥ ૧૪॥

ત્વં બાલા ત્રિપુરા પરા સુલલિતા પ્રત્યઙ્ગિરાઃ શારદા
વાચામીશ્વરી ચણ્ડિકા ચ બગલા જ્વાલામુખી વૈષ્ણવી ।
લક્ષ્મીર્નીલસરસ્વતી ચ વિજયા-શાકમ્ભરી ચાન્નદા
સર્વાસ્ત્વં મધુરામ્બિકે વિજયસે તે સુપ્રભાતં શિવમ્ ॥ ૧૫॥

કામાનામથ પૂરણૈકસુવિધૌ ત્વં કામધેનુઃ શુભે
ભક્તૈશ્ચિન્તિતસર્વદાનસુવિધૌ ચિન્તામણિસ્ત્વં હિ નઃ ।
કાઙ્ક્ષાપૂરણચાતુરી સુમહિતઃ શ્રીકલ્પવૃક્ષઃ સ્વયં
માતઃ શ્રીમધુરામ્બિકેષ્ટવરદે તે સુપ્રભાતં શિવમ્ ॥ ૧૬॥

સર્વાશ્ચર્યમયૈકચિત્રચરિતે વિસ્માપનીયોઽદ્ય મે
વિશ્વારાતિવિનાશનૈકનિપુણે વિદ્યાવયોવર્ધિનિ ।
વેદાન્તપ્રતિપાદ્યમાનવિભવે વિશ્વૈકજીવાતુકે
માતઃ શ્રીમધુરામ્બિકે ભયહરે તે સુપ્રભાતં શિવમ્ ॥ ૧૭॥

સૌમઙ્ગલ્ય-સુભર્તૃપુત્રસુખદે સૌવાસિનીપૂજિતે
સૌન્દર્યૈકનિધે સુરેન્દ્રવિનુતે સૌભાગ્યસંવર્ધિનિ ।
સૌશીલ્યાદિગુણપ્રદે ચ નમતાં સત્સૌમનસ્યપ્રદે
માતઃ શ્રીમધુરામ્બિકે શ્રુતિનુતે તે સુપ્રભાતં શિવમ્ ॥ ૧૮॥

વીણા-વેણુ-મૃદઙ્ગ-નાટ્યમુદિતે વીણામુનીન્દ્રસ્તુતે
શ્રીદુર્ગાપરસૂક્તમન્ત્રસુલભે વાણી-રમા-વીજિતે ।
દુર્ગા-લક્ષ્મિ-સરસ્વતીતિ વિનુતે કામેશવામાઙ્ગકે
માતઃ શ્રીમધુરામ્બિકે સુલલિતે તે સુપ્રભાતં શિવમ્ ॥ ૧૯॥

દીપં દીપયતીહ યચ્ચ સમયે શ્રીસોમવારે પુનઃ
તત્ શુક્રાવધિ જાજ્વલત્યતિતરાં ચૈતન્મહત્વં તવ ।
તલ્લિપ્તં ચ સુચન્દનં સુકુસુમં યચ્ચાર્ચિતં પાદયોઃ
નૈવ ક્લામ્યતિ સર્વશક્તિભરિતે તે સુપ્રભાતં શિવમ્ ॥ ૨૦॥

સમ્પ્રાપ્તાસ્તવ સન્નિધિં હિ કૃપયા સમ્પ્રાપ્નુવન્તિ ધ્રુવં
ચેતોહારિ સુસુન્દરં નિજપતિં વિદ્યાવયોભાસ્વરમ્ ।
સૌમગલ્યસમૃદ્ધિમાશુ લલના વિદ્યાં ચ બાલા ધનં
સર્વત્રૈવ જયં સદા સુમધુરે તે સુપ્રભાતં શિવમ્ ॥ ૨૧॥

કિં વા દુષ્કરમમ્બિકે તવ પદદ્વન્દ્વૈકસક્તાત્મનાં
કિં વા દુર્લભમસ્તિ તાવકમનું જપ્તુઃ સદા ધ્યાયિનામ્ ।
કિં વા દુર્જયમસ્તિ રક્તકુસુમૈર્નિત્યાર્ચનાં કુર્વતાં
માતઃ શ્રીમધુરામ્બિકેષ્ટવરદે તે સુપ્રભાતં શિવમ્ ॥ ૨૨॥

દાત્રી ત્વં નિખિલાનિ ચૈહિકસુખાન્યાતૃપ્તિ વન્દારુકે
દાસ્યન્તી સકલં મનોરથફલં ચામુષ્મિકં દેહિનામ્ ।
સાલોક્યાદિચતુષ્ટયં ચ સહસા દત્વાઽનુગૃહ્ણાસિ નઃ
માતઃ શ્રીમધુરામ્બિકેષ્ટવરદે તે સુપ્રભાતં શિવમ્ ॥ ૨૩॥

સૂર્યાચન્દ્રમસૌ તથા કુજબુધૌ જીવશ્ચ શુક્રશ્શનિઃ
રાહુઃ કેતુરભીષ્ટનિત્યવરદા યોગાશ્ચ તારાગણાઃ ।
શ્રીકાલીચરણારવિન્દપતિતં નો પીડયન્તિ ધ્રુવં
શ્રીનિઃશ્રેયસદાયિકે સુમધુરે તે સુપ્રભાતં શિવમ્ ॥ ૨૪॥

સર્વેષાં ચ મનઃપ્રશાન્તિમધુના દત્વાઽનુગૃહ્ણીષ્વ નઃ
માયામોહિતજન્તુજાતમધુના વિજ્ઞાનપૂર્ણં કુરુ ।
સર્વત્રૈવ ચકાસ્તુ ભારતતલે શાન્તિઃ પ્રશાન્તિઃ સુખં
માતઃ શ્રીમધુરામ્બિકે સુવરદે તે સુપ્રભાતં શિવમ્ ॥ ૨૫॥

જ્વાલામાલિનિ ચણ્ડિકે સુમધુરે સાન્દ્રાન્તરઙ્ગે સદા
અજ્ઞાનાત્ કૃતમન્તુજાલમધુના ત્વં વૈ ક્ષમસ્વામ્બિકે ।
નાવા સિન્ધુમિવાદ્ય તારય જનં સંસારવારાન્નિધેઃ
માતઃ શ્રીમધુરામ્બિકે સકરુણે તે સુપ્રભાતં શિવમ્ ॥ ૨૬॥

સામ્રાજ્ઞીપુર(સિરુવાચ્ચૂર્)વાસિની ભગવતી શ્રીમાધુરી કાલિકા
સુપ્રાતઃ પ્રપઠેદુષસ્યપિ મુદા યો વા નરઃ પ્રત્યહમ્ ।
તં વૈ રક્ષતિ સાન્દ્રનૈજહૃદયા માતેવ વાત્સલ્યતઃ
માતઃ શ્રીમધુરામ્બિકે સુલલિતે તે સુપ્રભાતં શિવમ્ ॥ ૨૭॥

દેવિ ત્વાં શરણં ગતોઽસ્મિ સતતં નાન્યા ગતિસ્ત્વાં વિના
ત્વં માતાસિ પિતા તથૈવ સહજો બન્ધુશ્ચ પુત્રી સુતઃ ।

સર્વસ્વં હિ મમ ત્વમેવ સિરુવાચ્ચૂર્ રાજ્ઞિ રક્ષેક્ષણે
પાહ્યસ્માન્ સકુટુમ્બકાન્ સુમધુરે તે સુપ્રભાતં શિવમ્ ॥ ૨૮॥

સપ્તવિંશતિસઙ્ખ્યાક-સુપ્રાતકમલૈશ્શુભૈઃ ।
ત્વામર્ચયામિ મધુરે પ્રસીદ વરદા ભવ ॥ ૨૯॥

ઇતિ સિરુવાચ્ચૂર્ શ્રીમધુરકાલિકામ્બાસુપ્રભાતં સમ્પૂર્ણમ્ ।

Encoded and proofread by PSA Easwaran

---

*Siruvachchur Madhurambika Suprabhatam*
pdf was typeset on January 15, 2022

Please send corrections to *sanskrit@cheerful.com*